जलपृष्ठजा, स्त्री, (जलस्य पृष्ठे उपरि प्रदेशे जायते इति । जन+डः ।) शैवालम् । इति शब्दचन्द्रिका ॥

जलप्रायं, क्ली, (जलस्य प्रायो बाहुल्यं यत्र ।) जलबहुलस्थानम् । अनूपदेशः । इत्यमरः । ३ । १ । १० ॥

जलप्रियः, पुं, (जलं प्रियं यस्य ।) चातकपक्षी । इति शब्दरत्नावली ॥ मत्स्यः । इति शब्दचन्द्रिका ॥

जलप्लवः, पुं, (जले प्लवते इति । प्लु+अच् ।) जलनकुलः । इति हारावली । ७६ ॥

जलफलं, क्ली, (जलजातं फलम् ।) शृङ्गाटकम् । इति भावप्रकाशः ॥

जलबन्धः, पुं, (जलं बध्नाति जीवनवृत्त्या निर्बन्धेन परिकल्पयतीति । बन्ध+अच् ।) मत्स्यः । इति शब्दचन्द्रिका ॥

जलबन्धकः, पुं, (जलं बध्नातीति । बन्ध+ण्वुल् ।) जलमध्यगं स्रोतोभेदकरं दारुशिलादि । तत्पर्य्यायः । विदारकः २ कूपकः ३ । इति शब्दरत्नावली ॥

जलबालकः, पुं, (जलेन बलयति जीवयति स्वाश्रितवृक्षादीनिति । बल जीवने+णिच्+ण्वुल् ।) विन्ध्यपर्व्वतः । इति हेमचन्द्रः । ४ । ९५ ॥

जलबालिका, स्त्री, (जलस्य बालिकेव ।) विद्युत् । इति हेमचन्द्रः । ४ । १७१ ॥

जलबुद्बुदं, क्ली, (जलस्य बुद्बुदम् ।) जलविम्बम् । यथा, मुद्गितस्वष्टतवचनम् ।

"मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम् ।
यः करोति स वै मूढो जलबुद्बुदसन्निभे ॥"

जलब्राह्मी, स्त्री, (जले ब्राह्मीव ।) हिलमोचो । इति हारावली । १८० ॥

जलभूः, पुं, (भवत्यस्मादिति । भू+अपादाने क्विप् । ततो जलस्य भूः ।) मेघः । (जलं भूरुत्पत्तिस्थानमस्य ।) कच्चटम् । इति शब्दचन्द्रिका ॥

जलमक्षिका, स्त्री, (जलजाता मक्षिका ।) वारिकृमिः । इति त्रिकाण्डशेषः ॥

जलमद्गुः, पुं, (जले मद्गुरिव ।) मत्स्यरङ्गपक्षी । इति हारावली । ८८ ॥

जलमधुकः, पुं, (जलजातो मधुकः ।) मधुकवृक्षप्रभेदः । जलमहुया इति भाषा । तत्पर्य्यायः । मङ्गल्यः २ दीर्घपत्रकः ३ मधुपुष्पः ४ क्षौद्रप्रियः ५ पतङ्गः ६ कीरेष्टः ७ गैरिकाख्यः ८ । अस्य गुणाः । मधुरत्वम् । व्रणवान्तिनाशित्वम् । शुक्रबलकारित्वम् । शीतत्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः । अथ महुया वनमहुया ।

"मधुको गुडपुष्पः स्यात् मधुवृक्षो मधुस्रवः ।
वानप्रस्थो मधुष्ठीलो जलजोऽत्र मधूलकः ॥
मधूकपुष्पं मधुरं शीतलं गुरु बृंहणम् ।
बलशुक्रकरं प्रोक्तं वातपित्तविनाशनम् ॥ * ॥
फलं शीतं गुरु स्वादु शुक्रलं वातपित्तनुत् ।
अहृद्यं हन्ति तृष्णास्रदाहश्वासक्षतक्षयान् ॥"
इति भावप्रकाशः ॥

जलमसिः, पुं, (जलेन जलाकारेण मस्यति परिणमतीति । मस परिणामे+इन् । घनीभूतमेघस्य जलाकारेण परिणमनात् तथात्वम् ।) मेघः । इति हारावली । १८ ॥

जलमार्गः, पुं, (जलस्य मार्गः निर्गमपथः ।) प्रणाली । इति हेमचन्द्रः । ४ । ५५ ॥ नर्दमा इति भाषा ॥

जलमार्जारः, पुं, (जलस्य मार्जारः जले मार्जार इव इति वा ।) जलनकुलः । इति त्रिकाण्डशेषः ॥

जलमुक्, [च्] पुं, (जलं मुञ्चतीति । मुच्+क्विप् ।) मेघः । इत्यमरः । १।३।७ ॥ (यथा, मेघदूते । ७१ ।

"शङ्कास्पृष्टा इव जलमुचस्त्वादृशा यत्र जालैर्धूमोद्गारानुकृतिनिपुणा जर्ज्जरा निष्पतन्ति ॥"

जलमोचके, त्रि । यथा, बृहत्संहितायाम् । १६ । २ ।

"तीक्ष्णं तपत्यदितिजः शिशिरेऽपि काले
नात्यम्बुदा जलमुचोऽचलसन्निकाशाः ॥")

जलमूर्त्तिः, पुं, (जलं मूर्त्तिर्यस्य ।) शिवः । इति तस्याष्टमूर्त्तिपूजायां तिथ्यादितत्त्वम् ॥

जलमूर्त्तिका, स्त्री, (जलस्य मूर्त्तिः घनीभूताकृतिः । ततः स्वार्थे संज्ञायां वा कन् टाप् च ।) करका । इति शब्दचन्द्रिका ॥

जलमोदं, क्ली, (जलेन जलसंयोगेन मोदयति आनन्दयति सद्गन्धप्रदानेनेत्यर्थः । मुद+णिच्+अण् ।) उशीरम् । इति राजनिर्घण्टः ॥

जलयन्त्रगृहम्, क्ली, (जलयन्त्रमिव कृतं गृहम् ।) जलमध्यकृतगृहम् । जल्टुङ्गि इति फोयारार घर इति च भाषा । तत्पर्य्यायः । समुद्रगृहम् २ । इति त्रिकाण्डशेषः ॥ जलयन्त्रनिकेतनम् ३ । इति हारावली ॥ जलयन्त्रमन्दिरम् ४ । यथा,—

"क्वचिद्विचित्रं जलयन्त्रमन्दिरम् ।"
इति कालिदासः ॥

जलरङ्कः, पुं, (जले सरसि रङ्क इव ।) वकपक्षी । इति हारावली । १८३ ॥

जलरङ्कुः, पुं, (जले रङ्कुरिव ।) दात्यूहपक्षी । इति हलायुधः ॥

जलरञ्जः, पुं, (जले रजति अनुरक्तो भवतीति । रञ्ज अनुरागे+अच् ।) वकपक्षी । इति हेमचन्द्रः । ४ । ३ । ८ ॥ (वकशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

जलरण्डः, पुं, (जलस्य रण्ड इव भयजनकत्वात् ।) जलावर्त्तः । पयोरेणुः । भुजङ्गमः । इति हेमचन्द्रः शब्दरत्नावली च ॥

जलरसः, पुं, (जलजातो रसः । जलप्रधानो रसो वा ।) लवणम् । इति हारावली । ७५ ॥

जलरुट्, [ह्] पुं, (जले रोहतीति । रुह्+क्विप् ।) पद्मम् । इति हेमचन्द्रः । ४।२२८ ॥

जलरुहं, क्ली, (जले रोहतीति । रुह+"इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) पद्मम् । इति हेमचन्द्रः । ४ । २२८ ॥ (यथा, महाभारते । १ । १२८ । ४१ ।

"जलस्य शुशुभे छन्नं फुल्लैर्जलरुहैस्तथा ॥")

जलरूपः, पुं, (जलस्य रूपमिव रूपं यस्य । शुभ्रवर्णत्वादस्य तथात्वम् ।) मकरः । इति त्रिकाण्डशेषः ॥

जललता, स्त्री, (जले लतेव तदाकारत्वात् ।) तरङ्गः । इति हारावली । २०५ ॥

जलवरण्टः, पुं, (जलं रसस्तत्प्रधानो वरण्टो वसन्तः ।) जलवसन्ताख्यव्रणः । पानीवसन्त इति भाषा । तत्पर्य्यायः । मोगः २ । इति हारावली । १४२ ॥

जलवल्कलः, पुं, (जलस्य वल्कल इव ।) कुम्भिका । इति हारावली ॥ ११२ । पाना इति भाषा ॥)

जलवल्ली, स्त्री, (जलजाता जलप्रधाना वा वल्ली ।) शृङ्गाटकः । इति राजनिर्घण्टः ॥

जलवायसः, पुं, (जले वायसः काक इव कृष्णवर्णत्वात् ।) मद्गुपक्षी । इति हेमचन्द्रः । ४ । ३९६ ॥ पानीकौड़ि इति भाषा ॥

जलवासं, क्ली, (जलेन वासो गन्धो यस्य ।) उशीरम् । इति राजनिर्घण्टः ॥

जलवासः, पुं, (जलं वासयतीति । वस+णिच्+अण् ।) विष्णुकन्दः । इति राजनिर्घण्टः ॥ (जले वासः निवासः । सलिलनिवासः । यथा, महाभारते । १२ । २६० । ५ ।

"स चिन्तायमास मुनिर्जलवासे कदाचन ॥"

जले वासो यस्य इति विग्रहे जलवासिनि, त्रि । यथा तत्रैव । १२ । २६० । ४ ।

"स कदाचित् महातेजा जलवासो महीपते ! ।
चचार लोकान् विप्रर्षिः प्रेक्षमाणो
मनोजवः ॥")

जलवाहः, पुं, (जलं वहतीति । वह+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) मेघः । इति हेमचन्द्रः । २ । ७८ ॥ (यथा, भारविः ।१२।२१

"सान्द्रजलधिजलवाहपथं
सदिगम्बुवामिव विम्बमोजसा ॥"

जलवाहके, त्रि । यथा, महाभारते ।२।७।२० ।

"जलवाहास्तथा मेघा वायवस्तनयित्नवः ॥")

जलविड़ालः, पुं, (जले विड़ाल इव ।) जलनकुलः । इति हारावली । ७६ ॥

जलविन्दुजा, स्त्री, (जलविन्दुभ्यो जायते इति । जन+डः ।) यावनालीशर्करा । इति राजनिर्घण्टः ॥

जलविल्वः, पुं, (जलप्रधानो विल्व इव ।) कर्कटः । मचाङ्गः । जलचत्वरम् । इति मेदिनी । वे, ५८ ॥ चातरजल इति भाषा ॥

जलविषुवं, क्ली, (जलप्रधानं विषुवम् ।) तुलासंक्रान्तिः । तत्पर्य्यायः । आश्विनचिह्नितम् २ । इति शब्दरत्नावली ॥ चक्रविशेषः । यथा,—

"मार्गं शिरे षण्मुखपक्षवैरं
वधश्चतुर्भं बहुवित्तलाभः ।